श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ मन्त्रपुष्पम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ मन्त्रपुष्पम् ॥

ओं॥ यो॑ऽपां पुष्पं॒ वेद॑। पुष्प॑वान् प्र॒जावा॓न् पशु॒मान् भ॑वति। च॒न्द्रमा॒ वा अ॒पां पुष्प॓म्। पुष्प॑वान् प्र॒जावा॓न् पशु॒मान् भ॑वति। य ए॒वं वेद॑। यो॑ऽपामा॒यत॑नं॒ वेद॑। आ॒यत॑नवान् भवति॥

अ॒ग्निर्वा अ॒पामा॒यत॑नम्। आ॒यत॑नवान् भवति। यो॓ऽग्नेरा॒यत॑नं॒ वेद॑। आ॒यत॑नवान् भवति। आपो॒ वा अ॒ग्नेरा॒यत॑नम्। आ॒यत॑नवान् भवति। य ए॒वं वेद॑। यो॑ऽपामा॒यत॑नं॒ वेद॑। आ॒यत॑नवान् भवति॥

वा॒यु॒र्वा अ॒पामा॒यत॑नम्। आ॒यत॑नवान् भवति। यो वा॒योरा॒यत॑नं॒ वेद॑। आ॒यत॑नवान् भवति। आपो॒ वै वा॒योरा॒यत॑नम्। आ॒यत॑नवान् भवति। य ए॒वं वेद॑। यो॑ऽपामा॒यत॑नं॒ वेद॑। आ॒यत॑नवान् भवति॥

अ॒सौ वै तप॑न्नपामा॒यत॑नम्। आ॒यत॑नवान् भवति। यो॑ऽमु॒ष्य॒ तप॑त आ॒यत॑नं॒ वेद॑। आ॒यत॑नवान् भवति। आपो॒ वा अ॒मु॒ष्य॒ तप॑त आ॒यत॑नम्। आ॒यत॑नवान् भवति। य ए॒वं वेद॑। यो॑ऽपामा॒यत॑नं॒ वेद॑। आ॒यत॑नवान् भवति॥

च॒न्द्रमा॒ वा अ॒पामा॒यत॑नम्। आ॒यत॑नवान् भवति। यश्च॒न्द्रम॑स आ॒यत॑नं॒ वेद॑। आ॒यत॑नवान् भवति। आपो॒ वै च॒न्द्रम॑स आ॒यत॑नम्। आ॒यत॑नवान् भवति। य ए॒वं वेद॑। यो॑ऽपामा॒यत॑नं॒ वेद॑। आ॒यत॑नवान् भवति॥

नक्षत्राणि वा अपामायतनम्। आयतनवान् भवति। यो नक्षत्राणामायतनं वेद। आयतनवान् भवति। आपो वै नक्षत्राणामायतनम्। आयतनवान् भवति। य एवं वेद। योऽपामायतनं वेद। आयतनवान् भवति॥

पर्जन्यो वा अपामायतनम्। आयतनवान् भवति। यः पर्जन्यस्यायतनं वेद। आयतनवान् भवति। आपो वै पर्जन्यस्याऽऽयतनम्। आयतनवान् भवति। य एवं वेद। योऽपामायतनं वेद। आयतनवान् भवति॥

संवत्सरो वा अपामायतनम्। आयतनवान् भवति। यस्संवत्सरस्यायतनं वेद। आयतनवान् भवति। आपो वै संवत्सरस्यायतनम्। आयतनवान् भवति। य एवं वेद। योऽप्सु नावं प्रतिष्ठितां वेद। प्रत्येव तिष्ठति॥

ओं राजाधिराजाय प्रसह्यसाहिने। नमो वयं वैश्रवणाय कुर्महे। स मे कामान्कामकामाय मह्यम्। कामेश्वरो वैश्रवणो ददातु। कुबेराय वैश्रवणाय। महाराजाय नमः॥

ओं शान्तिः शान्तिः शान्तिः॥